८६

अथ स्वर्णवृष्टि:

१ — २

शंकराचार्य विरचित:

२

श्री. श्रीरामचंद्रायनमः श्रीहरिंपरमानंदंउपदेष्टारमीश्वरं॥ व्यापकंसर्वलोकानांकारणं
१ तंनमाम्यहं॥१॥ अपरोक्षानुभूतिर्वैप्रोच्यतेमोक्षसिद्धये॥ सद्भिरेवप्रयत्नेनवीक्षणी
यामुहुर्मुहुः॥२॥ स्ववर्णाश्रमधर्मेणतपसाहरितोषणात्॥ साधनंप्रभवेत्पुंसांवैराग्या
दिचतुष्टयं॥३॥ ब्रह्मादिस्थावरांतेषुवैराग्यंविषयेष्वनु॥ यथैवकाकविष्ठायांवैरा
ग्यंतद्धिनिर्मलं॥४॥ नित्यमात्मस्वरूपंहिदृश्यंतद्विपरीतगं॥ एवंयोनिश्चयःसम्यग्वि
वेकोवस्तुनःसवै॥५॥ सदैववासनात्यागःशमोयमितिशब्दितः॥ निग्रहोबाह्यवृत्ति
नांदमइत्यभिधीयते॥६॥ विषयेभ्यःपरावृत्तिःपरमोपरतिर्हिसा॥ सहनंसर्वदुःखा
नांतितिक्षासाशुभामता॥७॥ निगमाचार्यवाक्येषुभक्तिःश्रद्धेतिविश्रुता॥ चित्तैका
ग्र्यंतुसल्लक्ष्येसमाधानमितिस्मृतं॥८॥ संसारबंधनिर्मुक्तिःकथंस्यान्मेकदाविधे॥ इ राम.
तियासुदृढाबुद्धिर्वक्तव्यासामुमुक्षुता॥९॥ इत्यपरोक्षानुभूत्यांसाधनचतुष्टयंप्रथ १
मप्रकरणं॥१॥ उक्तसाधनयुक्तेनविचारःपुरुषेणहि॥ कर्त्तव्योज्ञानसिद्ध्यर्थमात्मनः

म.१

श्री० मसउच्यते॥ तयोरैक्यं प्रपश्यंति किमज्ञानमतः परं॥२०॥ आत्मा नित्यो हि सद्रूपो देहो
२, नित्यो ह्यसन्मयः॥ तयोरैक्यं प्रपश्यंति किमज्ञानमतः परं॥२१॥ आत्मनस्तत्प्रका
शत्वं पदार्थविभासनं नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यंध्यं यतो निशि॥२२॥ देहोह
मित्ययं मूढो धृत्वा तिष्ठत्यहो जनः॥ ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा॥२३
ब्रह्मैवाहं समः शांतः सच्चिदानंदलक्षणः॥ नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बु
2 धैः॥२४॥ निर्विकारो निराकारो निरवद्योहमव्ययः॥ नाहं देहो ह्यसद्रूपो ज्ञानमि
त्युच्यते बुधैः॥२५॥ निरामयो निराभासो निर्विकल्पोहमाततः॥ नाहं देहो ह्यस
द्रूपो ज्ञानमित्युच्यते बुधैः॥२६॥ निर्गुणो निःक्रियो नित्यो नित्यमुक्तोहमच्यु
तः॥ नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः॥२७॥ निर्मलो निश्चलोनंतः शुद्धोहम राम.
जरोमरः॥ नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः॥२८॥ इति आत्मज्ञानप्रति २
पादनेनात्मरतीयं प्रकरणं॥ उ॥ स्वदेहं शोभनं संतं पुरुषाख्यं च संमतं॥ किंमू

श्चभमिष्ठता॥१०॥नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः॥यथापदार्थज्ञानं हि प्रकाशे
न विना क्वचित्॥११॥कोहं कथमिदं जातं को वै कर्त्तास्य विद्यते॥उपादानं किमस्तीह वि
चारः सोयमीदृशः॥१२॥नाहं भूतगणो देहो नाहं चाक्षगणस्तथा॥एतद्विलक्षणः
कश्चिद्विचारः सोयमीदृशः॥१३॥अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलायते॥संकल्पो
विविधः कर्त्ता विचारः सोयमीदृशः॥१४॥एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययं
यथैव मृद्घटादीनां विचारः सोयमीदृशः॥१५॥अहमेकोपि सूक्ष्मश्च ज्ञाता साक्षी स
दव्ययः॥तदहं तत्र संदेहो विचारः सोयमीदृशः॥१६॥इति विचारविवरणं नाम द्विती
यप्रकरणं॥आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः॥तयोरैक्यं प्रपश्यंति कि
मज्ञानमतः परं॥१७॥आत्मा नियामकश्चान्तर्देहो नियम्यबाह्यकः॥तयोरैक्यं प्र
पश्यंति किमज्ञानमतः परं॥१८॥आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचि
॥तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परं॥१९॥आत्मा प्रकाशकः स्वच्छो देहस्ता

श्री०
चानेकमंयुक्तं चलं दृश्यविकारि च ॥ अव्यापकमसद्रूपं तत्कथं स्यात्सुमानयोः ॥ ३९ ॥ एवं दे
३ हद्वयादन्य आत्मा पुरुष ईश्वरः ॥ सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥ इत्या
त्मदेहभागेन प्रपंचस्यैव सत्यता ॥ यथोक्ता तर्कशास्त्रेण ततः पुरुषार्थता ॥ ४१ ॥
इति बोढ्दर्शनेन नाम चतुर्थप्रकरणं ॥ ४ ॥ इत्यात्मदेहभेदेन देहात्मत्वं निवारितं ॥ इदा
3 नीं देहभेदस्यासत्त्वं स्फुटमुच्यते ॥ ४२ ॥ चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित्
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥ रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हि सर्पि
त णी ॥ भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥ उपादानं प्रपंचस्य ब्रह्मणोऽन्य
न्न विद्यते ॥ तस्मात्सर्वः प्रपंचोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥ व्याप्यव्यापकता मि
थ्या सर्वमात्मेति शासनात् ॥ इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥ श्रुत्या रास.
निवारितं नूनं नानात्वं स्वमुखेन हि ॥ कथमाभासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ३
४७ ॥ दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ॥ इह पश्यति नानात्वं मायया व

खस्वप्ने ममात्मानं देहातीतं करोति विभो ॥२९॥ स्वात्मानं स्वरूपं मूर्खेऽलं पुत्रस्याक्षं साच
पूरुषं ॥ देहातीतं सदाकारं स्फुरद्दर्शं भवादृशैः ॥३०॥ अहं शब्देन विख्यातः स्वेक
एव स्थितः परः ॥ स्थूलस्य सूक्ष्मकर्ता प्राप्तः कथं स्याद्देहकः पुमान् ॥३१॥ अहं विकारही
न स्त्रू देहो नित्यविकार ममायमिति वान् ॥ इति मे तीर्थे ते साक्षात्कथं स्याद्देहकः पुमा
न् ॥३२॥ अहं द्रष्टृतयामिद्धो देहो दृश्यतया स्थितः ॥ ममायमिति निर्देशात्कथं
स्याद्देहकः पुमान् ॥३३॥ यस्मात्सामिति श्रुसा तया पुरुषलक्षणं ॥ विनिर्णीतं वि
मूढेन कथं स्याद्देहकः पुमान् ॥३४॥ सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ॥ अप्युच
ते यतः अस्माकथं स्याद्देहकः पुमान् ॥३५॥ असंगः पुरुषः प्रोक्तो बृहदारण्यकेऽ
पि च ॥ अनंतमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥३६॥ तत्रैव च समाख्यातः स्व
यं ज्योतिर्हि पूरुषः ॥ जडः परप्रकाश्योऽयं कथं स्याद्देहकः पुमान् ॥३७॥ प्रोक्तोऽपि कर्म
कांडेन ह्यात्मा देहाद्विलक्षणः ॥ नित्यश्च यत्फलं भुंक्ते देहपातादनंतरं ॥३८॥ लिंगं

श्री० गुणातीतोनिसोद्येकश्चिदात्मकः ॥५८॥ यद्वन्मृदि घटभ्रान्तिः शुक्तौ वा रजतस्थितिः ॥
४ तद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणो विनश्यति ॥५९॥ यथा मृदि घटो नाम कनके कुंडला
भिधा शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥६०॥ यथैव व्योम्नि नीलत्वं यथा
नीरं मरुस्थले ॥ पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥६१॥ यथैव शून्ये वेता
लो गंधर्वाणां पुरं यथा ॥ यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥६२॥ यथा तरं
4 गकल्लोलैर्जलमेव स्फुरत्यलं ॥ पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथात्मता ॥६३॥
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः ॥ जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभा
वतः ॥६४॥ सर्वोपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः ॥ अज्ञानान्न विजानंति मृदे
व हि घटादिकं ॥६५॥ कार्यकारणता नित्यमास्ते घटमृदोर्यथा ॥ तथैव श्रुतियु राम.
क्तिभ्यां प्रपंचब्रह्मणोरिह ॥६६॥ गृह्यमाणे घटे यद्वन्मृत्तिकाभाति वै बलात् ॥ वी ४
क्षमाणे प्रपंचेपि ब्रह्मैवाभाति भासुरं ॥६७॥ सदैवात्मा विशुद्धोस्ति ह्यशुद्धो भाति वै सदा ॥ य
तिमास

चिंतो नरः॥४८॥ अहंत्वगाः सर्वभूतानि जायंते परमात्मनः॥ तस्माद्द्वैतानि न ह्येवम
वंतोऽस्व धारयेत्॥४९॥ अस्त्येव सर्वनामानि रूपाणि विविधानि च॥ कर्माण्यपि स
मग्राणि विभांतीति श्रुतिर्जगौ॥५०॥ सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतं॥ ब्र
ह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत्॥५१॥ स्वल्पमप्यंतरं कृत्वा जीवात्मपरमा
त्मनोः॥ यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितं॥५२॥ यत्राज्ञानाद्भवेद्द्वैतमित
रं तत्र पश्यति॥ आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि॥५३॥ यस्मिन्सर्वाणि भूतानि
ह्यात्मत्वेन विजानतः॥ न वै तस्य भवेन्मोहो न च शोको द्वितीयतः॥५४॥ अयमात्मा
हि ब्रह्मैव सर्वात्मकतया स्थितः॥ इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया॥५५॥
अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन्॥ असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः॥
रक्षणबाधतः॥५६॥ स्वप्ने जागरणं लीकं स्वप्नेऽपि जागरे न हि॥ द्वयमेव लयेना
स्ति लयोऽपि ह्युभयोर्न च॥५७॥ त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितं॥ अस्य द्रष्टा

श्री शीलाभ्यां सर्वं भाति स्वभात्मकं ॥ तद्ब्रह्मात्मनि देहत्वं परस्य सन्तानयोगतो ॥ ७८ ॥ अनलान्तं स्वभतो
५ नैव वर्त्तते भाति सूर्यवत् ॥ तद्ब्रह्मात्मनि ॥ ७९ ॥ महत्त्वे सर्ववस्तूनामणुत्वं घृतिदूरतः ॥
तद्ब्रह्मात्मनि ॥ ८० ॥ सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ॥ तद्ब्रह्मात्मनि ॥ ८१ ॥ का
चभूमौ जलत्ववाज्जलभूमौ हि काचतो ॥ तद्ब्रह्मात्मनि ॥ ८२ ॥ यद्वद्गौमणौ वह्निम
रौ वह्नितापमानं ॥ तद्ब्रह्मात्मनि ॥ ८३ ॥ पर्यैव दिग्विपर्यासो मोहाद्भवति कस्यचित्
८ तद्ब्रह्मात्मनि ॥ ८४ ॥ इन्दौ स्थूलसमं धावत्स्वमो धावति भाति वै तद्ब्रह्मात्मनि ॥ ८५ ॥ य
था ग्रहीतजले भाति चंचलत्वेन कस्यचित् ॥ तद्ब्रह्मात्मनि ॥ ८६ ॥ रावमात्मस्वविद्या
तो देहाध्यासो हि जायते ॥ स एवात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥ सर्वमात्मत राम.
नयाज्ञातं जगत्स्थावरजंगमं ॥ अभावात्सर्वभावानां देहतां चात्मतां कुतः ॥ ८८ ॥ आ ५
त्मानं सततं जानं कालं नय महामते ॥ प्रारब्धमखिलं भुंजन्नोद्वेगं कर्त्तुमर्हसि ॥
८९ ॥ उत्पन्ने ध्यात्मविज्ञाने प्रारब्धं नैव मुंचति ॥ इति यत्श्रूयते शास्त्रे तन्निराक्रियते

घेव द्विविधा रज्जुर्ज्ञानिनो ज्ञानिनोरिह ॥ ६८ ॥ कुंभो यथैव मन्मयस्तद्वद्देहोपि चिन्मयस्तद्
आत्मानात्म विभागोयं मुधैव क्रियते बुधैः ॥ ६९ ॥ इत्यपरोक्षानुभूत्यां आत्मानात्मविवेचनं नाम पंच
त्म मप्रकरणं ॥ ५ ॥ सर्पत्वेन यथा रज्जु रजतत्वेन शुक्तिका ॥ विनिर्णीता विमूढेन देहत्वेन त
थात्मता ॥ ७० ॥ घटत्वेन यथा पृथ्वी पटत्वेनैव तंतवः ॥ विनिर्णीता विमूढेन देहत्वेन तथा
त्मता ॥ ७१ ॥ कनकं कुंडलत्वेन तरंगत्वेन वै जलं ॥ विनिर्णीता विमूढेन देहत्वेन तथा
त्मता ॥ ७२ ॥ पुरुषत्वेन वै स्थाणुर्जलत्वेन मरीचिका ॥ विनिर्णीता विमूढेन तद्देह
त्वेन तथात्मता ॥ ७३ ॥ गृहत्वेन हि काष्ठानि खड्गत्वेनैव लोहता ॥ विनिर्णीता विमूढे
न देहत्वेन तथात्मता ॥ ७४ ॥ यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ॥ तद्वदात्म
योगतः निदेहत्वं पश्यत्यज्ञानत्वेन तथात्मता ॥ ७५ ॥ यायोगतः ७५ ॥ पोतेन गच्छतः पुंसः सर्व
भातीव चंचलं ॥ तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥ पीतत्वं हि यथा शुभ्रे
दोषाद्भवति कस्यचित् ॥ तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥ आचक्षुर्भ्यां भ्रम

॥श्री॥ नुभूत्यास्य प्रसन्नेनिरमनं नाम पंचदश कराणि ॥९॥ त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि ल

६ ब्धये ॥ तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥१००॥ नित्याभ्यासादृते प्राप्तिर्न भवे

त्सच्चिदात्मनः ॥ तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरं ॥१॥ यमो हि नियम

स्त्यागो मौनं देशश्च कालतः ॥ आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥२॥

६ प्राणसंयमनं चैव प्रत्याहारश्च धारणा ॥ आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि

वै क्रमात् ॥३॥ सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ॥ यमोयमिति संप्रोक्तोभ्य

सनीयो मुहुर्मुहुः ॥४॥ सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ॥ नियमो हि परा

नंदो नियमात्क्रियते बुधैः ॥५॥ त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् ॥ त्यागो राम.

हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥६॥ यस्माद्वाचो निवर्तंते अप्राप्य मनसा ६

सह ॥ यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥७॥ वाचो यस्मान्निवर्तंते तद्वक्तुं

धुना ॥९०॥ तत्त्वज्ञानोदयादूर्द्ध्वं प्रारब्धं नैव विद्यते ॥ देहादीनामसत्त्वात्तु यथा स्वप्नवि
बोधतः ॥९१॥ कर्मजन्मांतरीयं यत्प्रारब्धमिति कीर्त्तितं ॥ तत्तु जन्मांतराभावात्पुंसो नै
वास्ति कर्हिचित् ॥९२॥ स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ॥ अध्यस्तस्य कुतो
जन्म जन्माभावे स्थितिः कुतः ॥९३॥ उपादानं प्रपंचस्य मृद्भांडस्येव पश्यते ॥ अज्ञानं ने
तिवेदांतैस्तस्मिन्नष्टे क विश्वता ॥९४॥ यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥९५॥ रज्जुरूपे परिज्ञाते सर्पखंडं न तिष्ठति
अधिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां गतः ॥९६॥ देहस्यापि प्रपंचत्वात्प्रारब्धावस्थिति
कुतः अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥९७॥ क्षीयंते चास्य कर्माणि तस्मि
न्दृष्टे परावरे ॥ बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटं ॥९८॥ उच्यतेऽज्ञैर्बलादेत
त्तदानर्थद्वयागमः ॥ वेदांतमतहानं च यतो ज्ञानमिति श्रुतिः ॥९९॥ दसपरोक्षा

श्री॥ चसरेचकाख्यः समीरणः॥ ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः॥ १९॥ ततः सद्वृत्तिनिश्च
लत्वं कुंभकः प्राणसंयमः॥ अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनात्॥ २०॥ विषयेष्वात्मतां
दृष्ट्वा मनसश्चित्तमज्जनं॥ प्रत्याहारः स विज्ञेयोभ्यसनीयो मुमुक्षुभिः॥ २१॥ यत्र यत्र मनो
याति ब्रह्मणस्तत्र दर्शनात्॥ मनसा धारणं चैव धारणा सा परा मता॥ २२॥ ब्रह्मैवास्मी
ति सद्वृत्त्या निरालंबतया स्थितिः॥ ध्यानशब्देन विख्याता परमानंददायिनी॥ २३॥
7 निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः॥ वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञि॥ कः
॥ २४॥ इमं चाकृत्रिमानंदं तावत्साधु समभ्यसेत्॥ यश्यो यावत्क्षणात्पुंसः प्रयुक्तः स
भवेत्स्वयं॥ २५॥ इति पंचदश साधनं नाम सप्तमं प्रकरणं॥ ७॥ ततः साधननिर्मुक्तः सि
द्धो भवति योगिराट्॥ तत्स्वरूपं न चैतस्य विषयो मनसो गिरां॥ २६॥ समाधौ क्रियमा णम.
णे तु विघ्ना आयांति वै बलात्॥ अनुसंधानराहित्यमालस्यं भोगलालसं॥ २७॥ लय
स्तमश्च विक्षेपो रसास्वादश्च शून्यता॥ एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः॥ २८॥

नशक्यते॥प्रपंचोयदिवक्तव्यः सोपिशब्दविवर्जितः॥८॥ इतिवातद्भवेन्मौनं सतांसहजसंज्ञितं॥
गिरामौनंतुबालानां प्रयुक्तंब्रह्मवादिभिः॥९॥ आदावंतेचमध्येचजनोयस्मिन्नविद्यते॥येनेदं
सततंव्याप्तंसदेशोविजनःस्मृतः॥१०॥ कलनात्सर्वभूतानांब्रह्मादीनांनिमेषतः॥कालसब्दे
ननिर्दिष्टोह्यखंडानंदअद्वयः॥११॥ सुखेनैवभवेद्यस्मिन्नजस्रंब्रह्मचिंतनं॥ आसनंतद्वि
जानीयान्नेतरत्सुखनाशनं॥१२॥ सिद्धंयत्सर्वभूतादिविश्वाधिष्ठानमव्ययं॥ यस्मिन्सि
द्धाःसमाविष्टास्तद्वैसिद्धासनंभवेत्॥१३॥ यन्मूलंसर्वलोकानांयन्मूलंचित्तबंधनं॥ मू
लबंधःसदासेव्योयोग्योसौराजयोगिनां॥१४॥ अंगानांसमतांविद्यात्समेब्रह्मणि
लीयते॥ नोचेन्नैवसमानत्वमृजुत्वंशुष्कवृक्षवत्॥१५॥ दृष्टिंज्ञानमयींकृत्वापश्ये
त्ब्रह्ममयंजगत्॥ सादृष्टिःपरमोदारानानासाग्रविलोकिनी॥१६॥ द्रष्टृदर्शनदृश्या
नांविरामोयत्रवाभवेत्॥ दृष्टिस्तत्रैवकर्तव्यानसाग्रविलोकिनी॥१७॥ चित्तादिसर्वभावे
षुब्रह्मत्वेनैवभावनात्॥ निरोधंसर्ववृत्तीनांप्राणायामःसउच्यते॥१८॥ निषेधनंप्रपं

श्री॥ ८

त्यहं भवेन्मुनिः॥३९॥ भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना॥ पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रम
रकीटवत्॥४०॥ अदृश्यं भावरूपं च सर्वमेतच्चिदात्मकं॥ सावधानतया नित्यं स्वात्मानं भाव
येत्॥४१॥ दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत्॥ विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रस
पूर्णया॥४२॥ एभिरंगैः समायुक्तो राजयोग उदाहृतः॥ किंचित्पक्वकषायाणां हठयोगेन सं
युतः॥४३॥ परिपक्वं मनो येषां केवलोयं च सिद्धिदः॥ गुरुदैवतभक्तानां सर्वेषां सुलभो भव
ता॥१४४॥ इति श्रीमत्संकराचार्यविरचितमपरोक्षानुभूतिः संपूर्णा॥ लिखितं श्रीसीतारामभ

भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता॥ ब्रह्मवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्यसेत्॥२८॥ ये
हि वृत्तिं विहायैतां ब्रह्माख्यां पावनीं परां॥ वृथैव ते तु जीवंति पशुभिश्च समा नराः॥२९॥ ये
तु वृत्तिं विजानंति ज्ञात्वापि वर्द्धयंति ये। ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये॥३०॥ एषा
वृत्तिः समा वृद्धा परिपक्वा च सा पुनः। ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः॥३१॥ कुशला
ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः॥ तेप्यज्ञानतमा नूनं पुनरायांति यांति च॥३२॥ नि
१ मेषार्द्धं न तिष्ठंति वृत्तिं ब्रह्ममयीं विना॥ यथा तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः॥३३॥
कार्ये कारणता याता कारणे न हि कार्यता॥ कारणत्वं ततो नश्येत्कार्याभावे विचारतः॥३४॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरं॥ द्रष्टव्यं मृद्घटेनैव दृष्टांतेन पुनः पुनः॥३५॥ अनेनै
व प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत्॥ ~~उद्वै वाचामगोचरं~~॥ उदेति शुद्धचित्तानां वृत्तिज्ञानं त
तः परं॥३६॥ कारणं व्यतिरेकेण पुमानादौ विलोकयेत्॥ अन्वयेन पुनस्तद्धि कार्ये नित्यं
प्रपश्यति॥३७॥ कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत्॥ कारणत्वं स्वतो गच्छेद्व